"विदूरथस्य तनया दाक्षिणात्यस्य भूभृतः ।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥")

मानी, [न्] त्रि, (मानोऽस्यास्तीति । मान + इनिः ।) मानविशिष्टः । इति मेदिनी । ने, १०६ ॥ ( यथा, मार्कण्डेये । १२३ । २२ ।
"ततस्ते भूभृतः सर्व्वे वसुभर्त्तेन मानिना ।
निराकृताः सुनिर्विण्णाः प्रोचुरन्योन्यमाकुलाः ॥")
सिंहः । इति राजनिर्घण्टः ॥

मानुषः, पुं, ( मनोर्जातः । मनु + "मनोर्जाता-वञ्यतौ षुक् च ।" ४ । १ । १६१ । इत्यञ् षुगागमश्च ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ ( यथा, मनौ । ८ । २८४ ।
"चिकित्सकानां सर्व्वेषां मिथ्याप्रचरतां दमः ।
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ॥"
मनुष्यस्येदम् । अञ् । मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १३ । ६ । २० ।
"अकृत्वा मानुषं कर्म्म यो दैवमनुवर्त्तते ।
वृथा श्राम्यति संप्राप्य पतिं क्लीवमिवाङ्गना ॥")

मानुषिकं, त्रि, ( मनुष्यस्य भावः कर्म्म वा । मनुष्य + ठञ् । ) मनुष्यस्य कर्म्मादि । मनुष्यस्येदमितीदमर्थे ष्णिकप्रत्ययेन निष्पन्नम् ॥

मानुषी, स्त्री, (मानुषस्य स्त्री । मानुष + जातित्वात् ङीष् । ) मनुष्यस्त्रीजातिः । यथा,—
मनुष्यी मानुषी नारी मानवी मानुषस्त्रियाम् ।
इति शब्दरत्नावली ॥
( मनुष्य + अञ् + ङीष् । ) चिकित्साविशेषः । यथा,—
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा
मता ।"
इति शब्दचन्द्रिका ॥

मानुष्यं, क्ली, (मनुष्यस्य भावः । मनुष्यस्येदमिति वा । मनुष्य + ष्यञ् । ) मनुष्यस्य भावः । मनुष्यत्वम् । ( यथा, भागवते । ४ । २१ । २८ ।
"स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ।
लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥")
मनुष्यशरीरम् । यथा,—
"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वे याज्ञवल्क्यवचनम् ॥
( मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १ । १५२ । ११ ।
"गच्छ जानीहि के न्वेते शेरते वनमाश्रिताः ।
मानुष्यो बलवान् गन्धो घ्राणं तर्पयतीव मे ॥")

मानुष्यकं, क्ली, ( मनुष्याणां समूहः । मनुष्य + "गोत्रोक्षोष्ट्रोरभ्रेति ।" ४।२।३९। इति वुञ् । ) मनुष्यसमूहः । इत्यमरः ।३।२।४३। (मनुषस्येदं मानुष + यत् । स्वार्थे कन् । (मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । ५ । ७७ । ८ ।
"सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितम् ।
कृतं मानुष्यकं कर्म्म दैवेनापि विरुध्यते ॥")

मानोज्ञकं, क्ली, ( मनोज्ञस्य भावः कर्म्म वेति । "द्वन्द्वमनोज्ञादिभ्यश्च ।" ५ । १ । १३३ । इति वुञ् । ) मनोज्ञता । मनोज्ञस्य भाव इत्यर्थे कञ् प्रत्ययेन निष्पन्नम् ॥

मान्द्यं, क्ली, (मन्दस्य भावः कर्म्म वा । मन्द + "पत्यन्तपुरोहितादिभ्यो यक् ।"५।१।१२८। इति यक् । ) रोगः । इति हेमचन्द्रः ॥ मन्दता च । (यथा, कथासरित्सागरे । २४ । १२५ ।
"विश्रब्धं च ततस्तस्मिन् पुरोधसि चकार
सः ।
मान्द्यमक्षतराहारस्पृष्टोक्षततनुर्न्नेषा ॥")

मान्धाता, [ऋ] पुं, ( मां धास्यतीति । धेट् + तृच् । ) युवनाश्वराजपुत्रः । तत्पर्य्यायः । युवनाश्वजः २ । इति हेमचन्द्रः । ३ । ३६४ । तद्विवरणं यथा । 'तस्मात् प्रसेनजित् ततो युवनाश्वोऽभवत् । तस्य च पुत्रस्यानिर्निर्व्वेदात् मुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता । तस्याञ्चार्द्धरात्रे निवृत्तायां मन्त्रपूतजलपूर्णकलसं वेदीमध्ये निवेश्य ते मुनयः सुषुपुः । सुप्तेषु च तेषु अतीवतृट्परीतः स भूपालस्तमाश्रममण्डलं विवेश । सुप्तांश्च तानृषीन् नैवोत्थापयामास । तच्च कलसजलमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ । प्रबुद्धाश्च ऋषयः पप्रच्छुः । केनैतन्मन्त्रपूतं वारि पीतम् । अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति । इत्याकर्ण्य स राजा अजानता मया पीतमित्याह । गर्भश्च युवनाश्वोदरेऽभवत् । क्रमेण च ववृधे । प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निर्भिद्य निश्चक्राम । न चासौ राजा ममार । जातो नामैष कं धास्यतीति ते मुनयः प्रोचुः । अथागम्य देवराडब्रवीत् । मामयं धास्यति । ततोऽसौ मान्धाता नामतोऽभवत् । वक्त्रे चास्य प्रदेशिनी देवेन्द्रेण न्यस्ता तां पपौ । ताञ्चामृतस्राविणीमास्वाद्याह्नैवैकेन व्यवर्द्धत । स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे । भवति चात्र श्लोकः ।
"यावत् सूर्य्य उदेतिस्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥"
मान्धाता शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे । पुरुकुत्समम्बरीषं मुचुकुन्दञ्च तस्यां पुत्रत्रयमुत्पादयामास । पञ्चाशच्च दुहितरस्तस्यामेव तस्य नृपतेर्ब्बभूवुः ।" इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

मान्यः, त्रि, ( मान्यत इति । मान + कर्म्मणि ण्यत् । ) अर्च्यः । तत्पर्य्यायः । पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५ । इति जटाधरः ॥ ( यथा च मनौ । २ । १३९ ।
"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ ।"
प्रार्थनीयः । यथा, रामायणे । २ । ८ । १८ ।
"यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौशल्यातोऽतिरिक्तञ्च मम शुश्रूषते बहु ॥"
"मान्यः प्रार्थनीयः श्रेयस्करः । तथा तद्वत् ।"
इति तट्टीकायां रामानुजः ॥ )

मान्यस्थानं, क्ली, ( मान्यस्य स्थानं । ) पूज्यत्वकारणम् । यथा,—
"वित्तं बन्धुर्व्वयः कर्म्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं
गतः ॥"
इति मानवे २ अध्यायः । कौर्म्मे ११ अध्यायेऽप्येवम् ॥

मान्या, स्त्री, (मान्य + स्त्रियां टाप् ।) मदन्माला ।
यथा,—
"अनिर्मान्या तु मान्या च मदन्माला च
मोहना ।"
इति शब्दमाला ॥
पूज्या च ॥

मापत्यः, पुं, ( मा विद्यतेऽपत्यमस्य । ) कामः । इति हलायुधः ॥

मापनः, पुं, ( मापयति स्वर्णादिकमनेनेति । मा + णिच् + करणे ल्युट् । ) तुलः । इति शब्दचन्द्रिका ॥ परिमाणे, क्ली ॥ ( स्थियामप्यच । यथा, महाभारते । १ । ५१ । १५ ।
"यस्मिन् देशे च काले च मापनेयं प्रवर्त्तिता ॥")

मामकं, त्रि, ( ममेदम् । अस्मद् + "तवकममकावेकवचने ।" ४ । ३ । ३ । इति अण् ममकादेशश्च । ) मदीयम् । इति मेदिनी । के, १९८ ॥ ( यथा, महाभारते । १ । १०५ । १२ ।
"ततो मामाह स मुनिर्गर्भस्थस्तव मामकम् ॥")
ममतायुक्तः । इति शब्दमाला ॥ यथा च महाभारते । ४ । ५० । १७ ।
"अत्र या मामिका बुद्धिः श्रूयतां यदि रोचते ॥")

मामकः, पुं, ( माम + स्वार्थे कन् । ) मातुलः । इति मेदिनी ॥ के, १३८ ॥ ममायं वा ममेदमिति बुद्धिर्यस्य । कप् ।) कृपणः । इति शब्दमाला ॥

मामकीनं, त्रि, ( ममेदम् । अस्मद् + "तवकममकावेकवचने ।"४। ३ । ३। इति खञ् । ममकादेशश्च ।) मदीयम् । ममेदमित्यर्थे खीने स्त्रीत्वे अस्मद एकत्वाभदादेशे अस्य च ममकादेशे सद्धो मामकीनम् । इति दुर्गादासः ॥ (यथा, कथासरित्सागरे । १२ । १४५ ।
"एतच्च मे कियत् किं हि न बुद्ध्या साधयाम्यहम् ।
प्रभावं मामकीनं च श्रूयतां वर्णयामि ते ॥")

मायः, पुं, ( माया अस्यास्तीति । माया + अर्श आदित्वादच् । ) पीताम्बरः । ( यथा, महाभारते । १३ । २४ । १११ ।
"नमो विश्वाय मायाय चिन्त्याचिन्त्याय वै
नमः ॥")
(मयस्यापत्यं पुमान् । मय + अण् । ) असुरः । इति मेदिनी ॥ ये, ४६ ॥

माया, स्त्री, ( मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति । मा + "माच्छाससिसूभ्यो यः ।" उणा० ४ । १०९ । इति यः टाप् । ) इन्द्रजालादिः